# Shri Lalitatribhangi Stotram

# શ્રીલલિતત્રિભઙ્ગીસ્તોત્રમ્

## Document Information

Text title : Lalitatribhangi Stotram

File name : lalitatribhangIstotram.itx

Category : vishhnu, viThThaleshvara, krishna, puShTimArgIya

Location : doc_vishhnu

Author : Viththaleshvara

Proofread by : Mohan Chettoor, NA

Description/comments : puShTimArgIya

Latest update : June 21, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 21, 2022

*sanskritdocuments.org*

# શ્રીલલિતત્રિભઙ્ગીસ્તોત્રમ્

નમઃ પિતૃપદામ્ભોજરેણુભ્યો યન્નિવેદનાત્ ।
અસ્મત્કુલં નિષ્કલઙ્કં શ્રીકૃષ્ણેનાત્મસાત્કૃતમ્ ॥ ૧॥

વામજાન્વન્તાશ્રિતાતિવક્રદક્ષિણજાનુકમ્ ।
એતત્સમ્પ્રાપ્તસૌભાગ્યં વિચિત્રમણિભૂષણમ્ ॥ ૨॥

નખચન્દ્રમહઃ ક્ષિપ્તભક્તસન્તાપસન્તતિઃ ।
વિચિત્રભાવસન્તાનવિચિત્રીકૃતમાનસમ્ ॥ ૩॥

દક્ષિણપદતલપદ્મં વામપ્રપદસ્ય વામતઃ પ્રકટમ્ ।
સૌન્દર્યં કિમપિતરાં પ્રકટયતિ પ્રેમવલ્લભ્યમ્ ॥ ૪॥

વિકસિત-શારદ-કમલોદરમદહરણેઽપિ તત્ર પદ્માઙ્કમ્ ।
વહતા નિરવધિરસતા નિવેદ્યતે સ્વીયભક્તેષુ ॥ ૫॥

ભક્તાર્તિહરણે કાઞ્ચિત્ મર્યાદાં નૈવ મન્યતે ।
ઇતિ જ્ઞાપયિતું વજ્રરેખાં ધારયતિ સ્ફુટામ્ ॥ ૬॥

અનુગ્રહાનિલો યત્ર તત્સામ્મુખ્યં ભજન્ ત્યજન્ ।
અન્યાશાં રાજતે ભક્તે પદમેવમિતિ ધ્વજમ્ ॥ ૭॥

ધારયન્ જ્ઞાપયત્યેષઃ ત્યક્તભક્તાન્યદિક્ પ્રભુઃ ।
અતએવ હિ તત્સેવ્યો નિર્દોષગુણવિગ્રહઃ ॥ ૮॥

એતત્પદપઙ્કજમધુમત્તસ્યાઙ્કયં નિસર્ગએવાભૂત્ ।
નેતરભાવં ભજતે યદઙ્કુશો નિત્યમેવાઽસ્તિ ॥ ૯॥

કદાચિદ્વિવિધા લીલાઃ કર્તું ભક્તૈઃ સહ પ્રભુઃ ।
એવમ્ભૂતો વાદયતિ વેણુમિષ્ટં કરોતિ ચ ॥ ૧૦॥

પ્રપદોપરિ સઞ્ચારિચારુપીતાન્તરીયકઃ ।
ગુઞ્જદ્ભ્રમદ્ભ્રમરયુગ્વનમાલાતિસુન્દરઃ ॥ ૧૧॥

વિવિધરૂપસુચારુસુગન્ધયુઙ્મૃદુલપુષ્પચયૈરતિસુન્દરમ્ ।
ગ્રથિતમધ્યમદેશમતિપ્રિયાકરયુગેન હૃદિ સ્રજિ કામયે ॥ ૧૨॥

ગ્રીવોરઃસ્થલકટિતટકાઞ્ચીજાનુપ્રપદયોઃ સતતમ્ ।
વિહરન્તી વનમાલાસક્તાસીદલિકુલૈર્મત્તૈઃ ॥ ૧૩॥

ગભીરનાભિવિલસત્કાઞ્ચીદામલસન્મણીન્ ।
સ્વરુચારોચયન્નન્યાનપ્યાકલ્પાન્ બભૌ પ્રભુઃ ॥ ૧૪॥

ત્રિગુણાનિલસઞ્ચારચલત્પ્રાન્તાતિસુન્દરમ્ ।
ઉત્તરીયં બિભ્રદંસે શુશુભેઽતિતરાં હરિઃ ॥ ૧૫॥

વિવિધમહામણિખચિતૈઃ પરિતો મુક્તાફલાવલિગ્રથિતૈઃ ।
વલયાઙ્ગદકઙ્કણચયસકલાઙ્ગુલિભૂષણૈઃ રેજે ॥ ૧૬॥

કટ્યા કુટિલયા કાઞ્ચિદ્ભુવનત્રયમોહિનીમ્ ।
તનોતિ સુષમા નાભ્યાં સહ સામ્યેઽપિ દુર્લભામ્ ॥ ૧૭॥

રસભરભરિતં પાત્રં નામિતમન્યત્ર તં રસં કર્તુમ્ ।
એકત આનતમુન્નતમેકત ઇહ દૃશ્યતે સર્વૈઃ ॥ ૧૮॥

કટિતટગતભાવરસાનાં વ્રજાઙ્ગનાહૃત્સુપૂરણે સાપિ ।
અભવત્ તથૈવ હૃષ્ટા દૃષ્ટા પરમુપપદ્યતે કાઞ્ચ્યા ॥ ૧૯॥

વેણુરવાનુગયા નવનવચાપલ્યં પ્રાપ્ત વત્યોચ્ચૈઃ ।
વ્રજતરુણીમાનસધનસમ્પન્નયાભૂજ્જગજ્જડવત્ ॥ ૨૦॥

નયનામ્બુજસૌન્દર્યં મનસાં વચસામગોચરં સત્યમ્ ।
વ્રજસુન્દરીનયનમનોનુભવૈકગતં પરં હૃદ્યમ્ ॥ ૨૧॥

તત્રાપિ ભાવગર્ભં તરલતરં પ્રિયતમામુખામ્ભોજે ।
સ્થગિતં ભવદરુણતરપ્રાન્તં પ્રકટાનુરાગમિવ ॥ ૨૨॥

વિચિત્રવેણુતાનાબ્ધિતરઙ્ગાન્દોલિતાઞ્ચલમ્ ।
સ્થિરં વા તરલં વેતિ નૈવાભૂદવધારિતમ્ ॥ ૨૩॥

સ્મિતામૃતભરેણાત્મભક્તહૃત્પ્રાણપોષકમ્ ।
તત્રૈવ લયહેતુર્વા તેષામિતિ ન વેદમ્યહમ્ ॥ ૨૪॥

ભ્રૂચાપઃ સન્ધિતઃ કર્ણાવધ્યાકૃષ્ટઃ પ્રિયાહૃદિ ।
વિદ્ધઃ પ્રાણાનાજહાર સ્વસ્મિન્ અસ્મિન્ દયા ન હિ ॥ ૨૫॥

સ્મિત-કૌટિલ્ય-ચાપલ્યારુણિમામૃતસિન્ધુષુ ।
મગ્નાઃ કથઞ્ચિદ્જીવન્તિ ભક્તાસ્તત્તત્સ્વભાવતઃ ॥ ૨૬॥

શ઼ૃઙ્ગારરસસર્વસ્વં ભક્તભાવામૃતાવૃતિમ્ ।
અનુરાગચયં તારાશ્ચૈત્યાપાઙ્ગૈર્બિભર્ત્યસૌ ॥ ૨૭॥

સાલિકુલં કમલકુલં જિતં નિજાકારમાત્રતો જગતિ ।
પ્રકટાતિગૂઢરસભરભરિતો અભવત્ કુસુમશરકોટિઃ ॥ ૨૮॥

સ્નિગ્ધતા મુગ્ધતા વાપિ ચાતુરીસહજાપિ વા ।
નૈવ વર્ણયિતું શક્યાનુભવન્તીભિરપ્યહો! ॥ ૨૯॥

મન્યે ગોકુલતરુણી-નવનવભાવાઃ સ્વરાસસઞ્જાતાઃ ।
રતિરસસુધાબ્ધિપતિતપ્લવે પ્લવન્તે નિસર્ગમધુરતરાઃ ॥ ૩૦॥

સમ્મુખપ્રેક્ષણેઽપાઙ્ગપ્રેક્ષણેચ યથા રસઃ ।
તથારુણાભી રેખાભિર્જ્ઞાપયત્યમ્બુજેક્ષણઃ ॥ ૩૧॥

વિરલારુણરેખાભિઃ સિતગર્ભસ્ય નેત્રયોઃ ।
આવિર્ભવતિ યા શોભા તાં ન વક્તું ક્ષમા રમા ॥ ૩૨॥

પક્ષ્માણિ તરુણીભાવાન્ આનેતું ચરણાબ્જયોઃ ।
કરાઙ્ગુલિચયાભાનિ ભાસન્તે પરિતઃ બતઃ ॥ ૩૩॥

અતિસારસ્યતો નેત્રે સરસઃ પરિતોઽભવત્ ।
રસાઙ્કુરાઃ પક્ષ્મરૂપા ભાસન્તે સુષમાસ્પદાઃ ॥ ૩૪॥

આદાયાદાય ભક્તાનાં ભાવાન્ અતિમનોહરાન્ ।
નિમેષમિષતઃ સ્વાન્તઃ સઞ્ચયં કુરુતો મુદા ॥ ૩૫॥

સ્વતઃ સમર્થમપ્યેતત્ ત્રિલોકીમોહને બત ! ।
સ્મિતં સહાયં સમ્પ્રાપ્ય યત્કરોતિ ન વેદ્મિ તત્ ॥ ૩૬॥

રસપૂરૈઃ પ્લાવયતિ સ્વજનવિવેકત્રપાધૃતિરથવા ।
તાનેવ તદ્રસાબ્ધિષુ મગ્નાન્ કુરુતે તદૈવૈતત્ ॥ ૩૭॥

એતત્કાર્યસ્ય ભવને પ્રતિબન્ધેઽપિ ચેશ્વરઃ ।
ન શક્તો પ્રતિબદ્ધો યત્ તત્સ્વભાવસ્વભાવતઃ ॥ ૩૮॥

તત્રાપિ ચેત્સહાયોઽભૂદુદારો વેણુનિઃસ્વનઃ ।

ત્રિભઙ્ગશ્ચ ત્રિજગતિ ન જાને કા દશાવશા ॥ ૩૯॥

તિષ્ઠત્વન્યકથૈતાદૃક્સ્વરૂપં પ્રતિબિમ્બિતમ્ ।
ક્વચિત્ પશ્યેત્ સ્વયં નાથઃ કાં દશાં નુ ભજેત્ તદા!॥ ૪૦॥

પ્રાયો ન દર્શનાપેક્ષા યત્સ્વયં તદ્રસાત્મકઃ ।
પ્રિયાહૃદયનેત્રેષુ નિરુદ્ધોઽસ્તિ સુનાયકઃ ॥ ૪૧॥

એતત્સન્દર્શને તુ સ્યાત્ પ્રમદાભાવ એવ હિ ।
તચ્છાન્તિકર્તા કોન્યોઽત્ર ભવેત્ તેનાસ્તિ નૈવ તત્ ॥ ૪૨॥

અથવા તદ્રસાત્મા તદ્દર્શનેનતિતોષિતઃ ।
ભવતિ સ્વપ્રિયાવૃન્દવૃતોઽયં ગજરાડિવ ॥ ૪૩॥

કદાચિદથવા પ્રેષ્ઠા વિયોગાર્ત્યા તદાત્મકઃ ।
તાસામાવિર્ભવેદ્ભાવૈરેવ તાં શામયત્યપિ ॥ ૪૪॥

દૃષ્ટ્યાપિ રસરૂપત્વં મયિ જાનન્તુ મામકાઃ ।
તદર્થમાવિષ્કુરુતે ત્રિભઙ્ગં ભક્તલોચને ॥ ૪૫॥

રસાત્મત્વં સ્ફુટં સ્વસ્મિન્ ભક્તૈર્નૈવાનુભૂયતે ।
તદર્થમાવિષ્કુરુતે ત્રિભઙ્ગં ભક્તલોચને ॥ ૪૬॥

પુષ્ટિભક્તિં સ્થિરીકૃત્ય મર્યાદાં ચ તદાશ્રિતામ્ ।
કૃત્વા વૃન્દાવનક્ષોણીમયથાપૂર્વસંસ્થિતામ્ ॥ ૪૭॥

હૃદયં ભક્તહૃદયે સ્થિરં લોકાન્ નિજાન્ પરાન્ ।
પુષ્ટિદિશ્યેવ સુમુખાન્ કૃત્વા સંરાજતે પ્રભુઃ ॥ ૪૮॥

ઉદ્બુદ્ધશ‍ૃઙ્ગારરસસ્વરૂપો ભૂષણાદ્યપિ ।
તાદૃગેવાખિલાઙ્ગેષુ બિભ્રત્ સંરાજતે પ્રભુઃ ॥ ૪૯॥

શ્રુત્યાદ્યગમ્યં યદ્રૂપં સ્વલ્પકેન મયા કથમ્ ।
તન્નિરૂપયિતું શક્યં તદીયત્વાદ્ભવેદપિ ॥ ૫૦॥

તથાપિ શ્રીગોકુલેઽસ્મિન્ આવિર્ભૂતો વિરાજતે ।
અનન્યભક્તૈરનીશં પીયતે તત્સુધાસવઃ ॥ ૫૧॥

(સ મત્પ્રભુઃ સદાઽહં તુ તત્પાદાબ્જરસોસ્મિ વૈ ।
તત્પ્રભાવાદ્યથાશક્તિ વર્ણયામ્યવિચારયન્ ॥ )
(અયંશ્લોકઃ મુદ્રિતપાઠીવ અસ્તિ । અન્યત્ર નોપલભ્યતે)

અહઞ્ચ તત્પાદપદ્મરેણુરશ્મીતિ મત્પ્રભુઃ ।
સ ચાસ્તીતિ યથાશક્તિર્વર્ણયામ્યવિચારયન્ ॥ ૫૨॥

સ્વતો મલ્લોચનમનોવૃત્તિઃ વૃન્દાવનપ્રભુઃ ।
બૃહદ્વનપ્રિયઃ શશ્વત્ શિશિરીકુરુતાત્ સ્વતઃ ॥ ૫૩॥

અહં તદીય ઇત્યેષા તદ્વાર્તા રૂપિતા પરમ્ ।
તેન પ્રસન્નો ભવતુ દાસે શ્રીવિઠ્ઠલે પ્રભુઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્વિટ્ઠલનાથવિરચિતો
લલિતત્રિભઙ્ગનામા ગ્રન્થઃ સમ્પૂર્ણતામગમત્ ।

Proofread by Mohan Chettoor

---

*Shri Lalitatribhangi Stotram*

pdf was typeset on June 21, 2022

Please send corrections to *sanskrit@cheerful.com*